पोटिकः, पुं, (पोटः संश्लेषोऽस्यास्तीति ठन् ।) विस्फोटकः । इति केचित् ॥ (विस्फोटकशब्देऽस्य विवृतिर्ज्ञातव्या ॥)

पोट्टली, स्त्री, (पोटेन संश्लेषेण लीयते इति । ली+डः । पृषोदरादित्वात् साधुः । ङीप् ।) पोट्टलिका । वस्त्रबद्धद्रव्यम् । पुँटुलि इति भाषा । यथा,—

"शुद्धार्थं त्रिफलाक्वाथे गुडूच्याः क्वाथ एव वा ।
दोलायन्त्रे पुरः पाच्यः पोट्टल्या वस्त्रबद्धया ॥"
इति वैद्यकम् ॥

पोडुः, पुं, (पुडतीति । पुड+उन् ।) कपालास्थितलम् । इति राजनिर्घण्टः ॥

पोतः, पुं, स्त्री, (पुनातीति । पू+"हसिमृग्रिण्वामिदमिलूपूधूर्विभ्यस्तन् ।" उणा० ३ । ८६ । इति तन् ।) शिशुः । इत्यमरः । २ । ५ । ३८ ॥ (यथा, कथासरित्सागरे । १२ । १३३ ।

"तत्तस्मात् स्वर्णमूलाख्याद् गिरेः संप्रेष्य राघवान् ।
आनाययत् पक्षिपोतं गरुड़ान्वयसम्भवम् ॥")

पोतः, पुं (पुनाति इति । पू+"हसीति ।" उणा० ३ । ८६ । इति तन् ।) वहित्रम् । गृहस्थानम् । पोता इति भाषा । वस्त्रम् । इति मेदिनी । ते, ३७ ॥ दशवर्षीयहस्ती । इति हेमचन्द्रः ॥ समुद्रयानम् । जाहाज इति भाषा ॥ (यथा, देवीभागवते । १ । ३ । ४२ ।

"सम्प्राप्य मानुषभवं सकलाङ्गयुक्तं
पोतं भवार्णवजलोत्तरणाय कामम् ।
सम्प्राप्य वाचकमहो न शृणोति मूढ़ः
सो वञ्चितोऽत्र विधिना सुखदं पुराणम् ॥")

यथा,—

"समुद्रयाने रत्नानि महामौल्यानि साधुभिः ।
रत्नपारीक्षकैः सार्द्धमानयिष्ये बहूनि च ॥
शुकेन सह संप्राप्तो महान्तं लवणार्णवम् ।
पोतारूढ़ास्ततः सर्व्वे पोतवाहैरुपासिताः ।
अपारे दुस्तरेऽगाधे यान्ति वेगेन निर्भयाः ॥"
इति वाराहे गोकर्णमाहात्म्याध्यायः ॥

पोतकी, स्त्री, (पोत इवेति । पोत+इवार्थे कन् । स्त्रियां ङीप् ।) पूतिका । इति शब्दमाला ॥ (अस्याः पर्य्यायो गुणाश्च यथा,—

"पोतक्युपोदिका सा तु मालवाम्लवल्लरी ।
पोतकी शीतला स्निग्धा श्लेष्मला वातपित्तनुत् ॥
अकण्ठ्या पिच्छिला निद्राशुक्रदा रक्तपित्तजित् ।
बलदा रुचिकृत् पथ्या बृंहणी तृप्तिकारिणी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

श्यामापक्षी । इति राजनिर्घण्टः ॥

पोतजः, पुं, (पोतः सन् न तु डिम्बादिरूप इति भावः । जायते इति । जन+डः ।) कुञ्जरादिः । यथा, हेमचन्द्रः । ४ । ४२१ ।

"अण्डजाः पक्षिसर्पाद्याः पोतजाः कुञ्जरादयः ॥"

पोतवणिक्, पुं, (पोतेन वणिक् ।) वहित्रेण वाणिज्यकर्त्ता । नौवाणिज्यकरः । तत्पर्य्यायः । सांयात्रिकः २ । इत्यमरः । १ । १० । १२ । समुद्रयानचारी ३ । इति जटाधरः ॥ नौवाणिज्यकरः ४ । इति शब्दरत्नावली ॥

पोतरक्षः, पुं, (पोतं रक्षतीति । रक्ष+"कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) केनिपातकः । इति शब्दमाला ॥ हालि इति भाषा ॥

पोतलकप्रियः, पुं, (पोतलकः पर्व्वतविशेषः प्रियोऽस्य ।) बुद्धविशेषः । इति त्रिकाण्डशेषः ॥

पोतवाहः, पुं, (पोतं नावं वहतीति । वह+"कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) वहित्रवाहकः । दाँड़ि इति भाषा । तत्पर्य्यायः । नियामकः २ । इत्यमरः । १ । १० । १२ ॥

पोता, [ऋ] पुं, (पुनातीति । पू+"नप्तृनेष्टृत्वष्टृहोतृपोतृभ्रातृजामातृमातृपितृदुहितृ ।" उणा० २ । ९६ । इति तृन्प्रत्ययेन निपात्यते ।) विष्णुः । इति संक्षिप्तसारोणादिवृत्तिः ॥ ऋत्विक् । इति भूरिप्रयोगः ॥ (यथा, ऋग्वेदे । ४ । ६ । ३ ।

"स सद्म परि णीयते होता मन्द्रो दिविष्टिषु । उत पोता नि षीदति ॥")

पोताच्छादनं, क्ली, (पोतमिवाच्छादयतीति । आ+छादि+ल्युः ।) वस्त्रकुट्टिमम् । इति हारावली ॥

पोताधानं, क्ली, (आधीयतेऽनेनेति । ल्युट् । आधानम् । पोतानां अल्पजमत्स्यानामाधानम् ।) क्षुद्राल्पमत्स्यसंघातः । इत्यमरः । १ । १० । १६ ॥ पोना इति भाषा । अस्य गुणाः । सुस्निग्धत्वम् । लघुत्वम् । रोचनत्वञ्च । इति राजवल्लभः ॥

पोतिका, स्त्री, (पोतोऽस्त्यस्या इति । पोत+ठन् । यद्वा, पूतिका पृषोदरादित्वात् साधुः ।) पूतिका । इत्यमरटीकायां भरतः ॥ शतपुष्पा ॥ मूलपोती । इति राजनिर्घण्टः ॥

पोतासः, पुं, (पोतेभ्यः शिशुभ्यः अस्यते क्षिप्यते इति । अस+घञ् ।) कर्पूरविशेषः । इति राजनिर्घण्टः ॥

पोत्रं, क्ली, (पूयतेऽनेनेति । पू+"हलसूकरयोः पुवः ।" ३ । २ । १८३ । इति ष्ट्रन् ।) शूकरमुखाग्रम् । लाङ्गलमुखाग्रम् । वस्त्रम् । इति मेदिनी । रे, ६१ ॥ वहित्रम् । इति संक्षिप्तसारोणादिवृत्तिः ॥ (पोतृनामर्त्विजः पात्रभेदः । यथा, ऋग्वेदे । १ । १५ । २ ।

"मरुतः पिवत ऋतुना पोत्राद्यज्ञं पुनीतन । यूयं हि ष्ठा सुदानवः ॥" "पोत्रात् पोतृनामकस्य ऋत्विजः पात्रात् सोमं पिवत ।" इति तद्भाष्ये सायनः ॥)

पोत्रायुधः, पुं, (पोत्रं तन्मुखाग्रमेव आयुधं यस्य ।) शूकरः । इति राजनिर्घण्टः ॥

पोत्रिरथा, स्त्री, (पोत्री शूकरः रथ इव गतिसाधकोऽस्याः ।) जिनशक्तिविशेषः । इति त्रिकाण्डशेषः ॥

पोत्री, [न्] पुं, (पोत्रमस्यास्तीति । पोत्र+इनिः ।) शूकरः । इत्यमरः । २ । ५ । २ ॥ पोत्रविशिष्टे, त्रि ॥

पोतिन्दः, पुं, (पोतस्य अलिन्द इवेति । पृषोदरादित्वात् साधुः ।) नौकावयवभेदः । तत्पर्य्यायः । मादारकः २ । इति त्रिकाण्डशेषः ॥

पोलिका, स्त्री, (पोली+स्वार्थे कन् टाप् । पूर्व्वह्रस्वश्च ।) पिष्टकविशेषः । पातला रोटी इति हिन्दी भाषा । यथा,—

"कुर्य्यात् समितयातीव तन्वीं पर्पटिकां ततः ।
खेदयेत्तप्तके तान्तु पोलिकां तां जगुर्ब्बुधाः ॥
तां खादेल्लघिकायुक्तां तस्यां मण्डकवद्गुणाः ।
तप्तकं तावा इति लोके ।" इति भावप्रकाशः ॥

तत्पर्य्यायः । पूलिका २ पौलिः ३ पूपिका ४ पूपला ५ । इति हेमचन्द्रः ॥

पोली, स्त्री, (पोलति महत्त्वं गच्छतीति । पुल+ज्वलादित्वात् णः । ङीष् ।) पिष्टकविशेषः । तत्पर्य्यायः । पूपाली २ चर्पटी ३ । इति त्रिकाण्डशेषः ॥

पोषः, पुं, पोषणम् । पुषधातोर्भावे घञ्प्रत्ययनिष्पन्नः । यथा, भट्टिः ।

"यः सर्व्वदासानपुषत् स्वपोषम् ॥"

(यथा, च भागवते । ३ । ३० । १० ।

"अर्थैरापादितैर्गुर्व्या हिंसयेतस्ततश्च तान् ।
पुष्णाति येषां पोषेण शेषभुग्यात्यधः स्वयम् ॥")

पोषणं, क्ली, (पुष+ल्युट् ।) पुष्टिः । वृत्तिः । पुषधातोर्भावेऽनट् प्रत्ययनिष्पन्नः ॥ (यथा, मार्कण्डेये । २८ । ८ ।

"तद्वद्विजातिशुश्रूषा पोषणं क्रयविक्रयौ ।
वर्णधर्म्मास्त्विमे प्रोक्ताः श्रूयन्तामाश्रमाश्रयाः ॥")

पोषयित्नुः, पुं, (पोषयतीति । पुष+णिच्+"स्तनिहृषिपुषिगदिमदिभ्यो णेरित्नुच् ।" उणा० ३ । २६ । इति इत्नुच् ।) कोकिलः । भर्त्ता । इति संक्षिप्तसारोणादिवृत्तिः ॥ पोषककर्त्तरि, त्रि ॥

पोष्टा, [ऋ] पुं, (पुष्णातीति । पुष+तृच् ।) पूतीकः । इति शब्दचन्द्रिका ॥ काँटाकरञ्ज इति भाषा ॥ पोषककर्त्तरि, त्रि ॥ (यथा, हरिवंशे । २५ । १७ ।

"ताभिर्धार्य्यन्त्यमी लोकाः प्रजाश्चैव चतुर्विधाः ।
पोष्टा हि भगवान् सोमो जगतो जगतीपते ! ॥")

पोष्टृवरः, त्रि, पोषकश्रेष्ठः । पोष्टृषु वर इति सप्तमी तत्पुरुषसमासः ॥

पोष्यः, त्रि, (पुष्यते इति । पुष+ण्यत् ।) पोषणीयः । पोषितव्यः । पुषधातोः कर्म्मणि यप्रत्ययनिष्पन्नः ॥ (यथा, राधातन्त्रे चतुर्दशपटले ।

"नन्दगोपस्य देवेशि ! तथास्तु सर्व्वदा प्रियः ।
आत्मना जायते यस्तु आत्मजः स उदाहृतः ।
पोष्यः पुत्र इति ख्यातो नन्दस्य वरवर्णिनि ! ॥")

पोष्यपुत्रः, पुं, (पोष्यः पुत्रः । पोष्यत्वेनैव पुत्रत्वं प्राप्त इत्यर्थः ।) पालनादिना सुतत्वप्राप्तः यथा, ब्रह्मवैवर्त्ते गणपतिखण्डे १४ अध्याये ।

"अधुना कृत्तिकानाश्च वत्सो नत्पोष्यपुत्रकः ।
तन्नाम चक्रुस्ताः प्रेम्णा कार्त्तिकश्चेति कौतुकात् ॥"